रेकिता-त्री, रेकयिता-त्री, रिरेकिषिता-त्री, रेरेकिता-त्री ;
इत्यादीनि समस्तान्यपि रूपाणि भौवादिककेपतिवत् (261) बोध्यानि ।

(1437) "रेजृ दीप्तौ" (I-भ्वादि:. अक. सेट्. आत्म.)

धातुरयं चन्द्रसम्मतपाठत्वेन क्षीरतरङ्गिण्यादिषु उपात्तः । "अत्र रेजिरपि क्वचित् पठ्यते, तदनार्षमिव । यदाह भट्टभास्करः "--'रेजते अग्ने पृथिवी मखेभ्यः--' इत्यत्र राजतेश्छान्दसत्वम् ।' इति ।" इति मा. धातुवृत्तिः ।
रेजकः-जिका, रेजकः-जिका, रिरेजिषकः-षिका, रेरेजकः-जिका ;
रेजिता-त्री, रेजयिता-त्री, रिरेजिषिता-त्री, रेरेजिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतेजतिवत् (779) ज्ञेयानि ।

(1438) "रेटृ परिभाषणे" (I-भ्वादि:-864. सक. सेट्. उभ.)
'—याचने च इति द्रुमे' इति धा. का. व्याख्यायाम् (2-25) ।
रेटकः-टिका, रेटकः-टिका, रिरेटिषकः-षिका, रेरेटकः-टिका ;
रेटिता-त्री, रेटयिता-त्री, रिरेटिषिता-त्री, रेरेटिता त्री ;
इत्यादिकानि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि ।
शतरि-रेटन्[A] इति ।

(1439) "रेपृ गतौ" (I-भ्वादि:-372. सक. सेट्. आत्म.)
'— शब्दे च' इति क्षीरस्वामी ।
रेपकः-पिका, रेपकः-पिका, रिरेपिषकः-षिका, रेरेपकः-पिका ;
रेपिता-त्री, रेपयिता-त्री, रिरेपिषिता-त्री, रेरेपिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेरतिवत् (261) ज्ञेयानि ।

(1440) "रेभृ शब्दे" (I-भ्वादि:-385. अक. सेट्. आत्म.)
रेभकः-भिका, रेभकः-भिका, रिरेभिषकः-षिका, रेरेभकः-भिका ;
रेभिता-त्री, रेभयिता-त्री, रिरेभिषिता-त्री, रेरेभिता-त्री ;

---

A. 'रेटत्तटा या खलु चातकैश्च चायं जलं प्रोथति दातुमुर्व्याम् ॥' धा. का. 2.25.